Acknowledgement

## प्रथमं निवेदनम्

"भारतचम्पूकाव्यस्य साहित्यदृष्ट्या समीक्षणम्"

इत्यस्य

नूतनज्ञानाभिवृद्धौ - प्रयोजकत्वम्

'भारतचम्पू' काव्यस्य अध्ययनं कृत्वा मया लिखिते 'भारतचम्पूकाव्यस्य साहित्यदृष्ट्या समीक्षणम्' इतिनाम्नि महतिशोधनिबन्धे एव यथा तस्य तत्वप्रकाशनं रसभावादिध्वनीनां गुणालंकारादीनां च विवेचनम्, रसभावादीनां नायकनायिकादीनां चमुख्यामुख्यत्वविचारः, तस्यरचनाशैल्या विमर्शः इतरचम्पूकाव्यैस्तस्य तुलनात्मिका समालोचना, तत्रत्यच्छन्द सामौचित्यानौचित्यविवेकः, तद्गतत्रुटीनां च प्रतिपादनं द्रष्टुं शक्यते, तथा नाऽन्यत्र कुत्राऽपि द्रष्टुं शक्यम् ।

चम्पूकाव्यस्य प्रारम्भं तृतीयायां दशम्यां वा शताब्द्यां विज्ञामन्यन्ते, किन्तु समीक्षायामस्यां तत्सत्ता उपनिषत्स्वपि साधिताद्रष्टुं शक्यते, तदेतदन्यत्र नोपलब्धुं शक्यम् ।

'भारतचम्पू' काव्यात् कविकालिकी या धार्मिकी, सांस्कृतिकी, सामाजिकी, राजनीतिकी च परिस्थितिः परिचेतुं शक्यते, साऽपि समीक्षायामस्यामेव सप्रमाणं प्रकाशिता प्राप्तुं शक्यते, नाऽन्यत्र ।

'भारतचम्पू' काव्यस्य बह्वो व्याख्याग्रन्थाः सन्ति, तेकीदृश् व्याचक्षते, काश्च तेषु त्रुटयः? इत्यपि समीक्षायामस्यामेव प्राप्तुं शक्यम्, नाऽन्यत्र ।

'भारतचम्पू' काव्यं बहुभिरैतिहासिकैः किंचिदालोचितम्, तदालोचनायाः प्रकारः, तदीयौचित्यानौचित्य विचारश्चाऽपि समीक्षायामस्यामेव प्राप्तुं शक्यम्, नाऽन्यत्र।

एवं भारतचम्पू' काव्यविषये लिखितस्य मत्कृतसमीक्षाग्रन्थस्याऽस्य नूतनज्ञानाभिवृद्धौ प्रयोजकत्वम् उपादेयत्वम् महत्त्वं च सुतरांमन्तव्यमेव भवति, न तत्र काऽपि विचिकित्सा संभवति।

अथ यावत् चम्पूकाव्य विषये यत्किंचित् कैश्चित्लिखितम्, तदतीवा

ऽपर्याप्तम् । चम्पूकाव्येषु केषां चिन्निर्मतिः रचनाकालस्यचोल्लेखमात्रम्, केषां चिच्च तत्सूक्तीनामुद्धरणमात्रम् तत्समीक्षार्थं न कथमपि पर्याप्तं गणयितुं शक्यम् । भारत चम्पू काव्यस्य तु साहित्यदृष्ट्या मयालिखिता समीक्षैव सर्वथा पूर्णा पर्याप्ता चेत्यलं विस्तरेण ।

----

## द्वितीयं निवेदनम्

" भारतचम्पू काव्यस्य साहित्यदृष्ट्या समीक्षणम् नाम शोधनिबन्धं लिखता मया " भारतचम्पू " काव्यस्य व्याख्याग्रन्थानां तदीयसमालोचनाग्रन्थानां च मुद्रितानाममुद्रितानां च यत्र तत्रोपलभ्यानां समेषामेवोपयोगो विहितोऽस्ति ।

समीक्षायामस्यां येभ्यो ग्रन्थेभ्यः सिद्धान्तानां प्रतीकानां चक्रणादानं मया आवश्यकरूपेण कृतमस्ति, तेषां तत्र तत्र पादटिप्पण्डां मया तत्स्वीकारोऽपि, सूचित एवाऽस्ति ।

----